रुद्र इति यः पूर्वं

'मध्यदेशे स्थितो रुद्रस्त्वहंकारेश्वरः प्रभुः ।' (८९०)

इत्युक्तः। प्रेर्यते संसाररक्षार्थमभिमानात्मनि स्वकार्ये प्रवर्त्यते ॥ १३३ ॥

एतं ये परिवृत्य स्थिताः, तेऽपि

छगलाण्डादयो देवि
पूर्वं ते कथिता मया।

गतमेतत् ॥

अहंकारादथोर्ध्वं तु
बुद्ध्यावरणमुच्यते ॥ १३४ ॥
सूर्यकोटिसहस्राणां
तेजसा तुल्यवर्चसम्।

वर्चो दीप्तिः ॥

किंच

अष्टानां देवयोनीना-
मत्रैव भुवनं शृणु ॥ १३५ ॥

प्राक् ब्रह्माण्डरूपेणोक्तानां पैशाचादिब्रह्मपर्यन्तानामष्टानां देवयोनीनां सात्त्विकादिवृत्ति-

त्कैश्चित् योजितं, तदसदेव । केवलमेषां ताव-द्भोगलिप्सुजनाशयेन तावत्पद्प्रापकाणां पर-मेश्वरयोगात्तत्र अवस्थानम् ॥ १०६३ ॥

अतश्च एषां

गजाकाराणि दिव्यानि
सर्वेषां भुवनानि तु ।

पूर्वं

'वीरभद्रनिकेतश्च भद्रकाल्यालयस्तथा ।
त्रयोदशभिः······················ ॥' (७५३)

इति ग्रन्थेन श्वेतादिभुवनान्येकादश भद्रकालीवीरभद्रभुवनाभ्यां सह त्रयोदश संकलितानि । यत्पुनः

'·········अन्यैश्च भुवनैरुपशोभितम् ।' (७५३)

इत्युक्तं, तत्र अन्यानि भुवनानि वीरभद्रभुवनोर्ध्वगतानि ॥

अथ अण्डवर्तिनोऽङ्गुष्ठमात्रप्रमाणरुद्रभुवनात्प्रभृति गुणतत्त्वान्तमसंकलितान्रुद्रान्संकलयितुमाह

बुद्धेः प्रकृतिपर्यन्ते
ये रुद्रास्तान्निबोध मे ॥१०६४॥

